## चतुर्थः पाठः

# न लभ्यते चेत् आम्लं द्राक्षाफलम्

0772CH04





एकः शृगालः

एकः शृगालः वनं गच्छति।
पिपासा, तस्य बुभुक्षा
पिपासया बुभुक्षया वनं गच्छति
सः वनं गच्छति, सः वनं गच्छति।
तत्र गच्छति, किमपि न लभते
इतोऽपि गच्छति, किमपि न लभते
श्रान्तः जायते, खिन्नः जायते
सः श्रान्तः जायते, खिन्नः जायते
किं च करोति ? सः किं च करोति ?

वामतः पश्यति, दक्षिणतः पश्यति
अग्रतः पश्यति, पृष्ठतः पश्यति
स्वेदः जायते, तृषा जायते
तस्य स्वेदः जायते, तृषा जायते
किं च पश्यति ? सः किं च पश्यति ?
किं च पश्यति ? सः किं च पश्यति ?

© NCERT not to be republished




Reprint 2026-27

पश्यति द्राक्षालतां
सः पश्यति द्राक्षाफलम्
उपरि उपरि लतासु दृश्यते च तत्फलम्
अनुक्षणं तन्मुखे रसः जायते
किं च करोति ? सः किं च करोति ?

एकवारम् उत्पतति, द्विवारम् उत्पतति
त्रिवारम् उत्पतति, पुनः पुनः उत्पतति
स्वेदः जायते, तस्य श्रमः जायते
किं कथयति ? सः किं कथयति ?

आम्लं द्राक्षाफलम् आम्लं द्राक्षाफलम्
इत्येवं कथयति, सः पलायते
इत्येवं कथयति, सः पलायते ॥



© NCERT not to be republished



Reprint 2026-27

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| शृगालः | लोमशा | लोमड़ी | Fox | |
| वनम् | काननम् | अरण्य | Forest | |
| पिपासा | पातुम् इच्छा | प्यास | Thirst | |
| बुभुक्षा | भोक्तुम् इच्छा | भूख | Hunger | |
| किमपि | यत् किञ्चित् | कुछ भी | Anything | |
| इतोऽपि | अतः परम् अपि | और भी | More than this | |
| लभते | प्राप्नोति | पाता है | Gets | |
| श्रान्तः | क्लान्तः | थका हुआ | Tired | |
| खिन्नः | दुःखितः | खेद से युक्त | Sad | |
| जायते | भवति | होता है | Becomes | |
| वामतः | वामभागे | बायीं ओर | Towards left | |
| दक्षिणतः | दक्षिणभागे | दाहिनी ओर | Towards right | |
| अग्रतः | अग्रभागे | आगे | In front | |
| पृष्ठतः | पृष्ठभागे | पीछे | Behind | |
| स्वेदः | घर्मः | पसीना | Sweat | |
| तृषा | पिपासा | प्यास | Thirst | |
| द्राक्षालताम् | द्राक्षाफलस्य वल्लीम् | अंगूर की बेल को | Grape-vine climber | |
| उपरि | ऊर्ध्वभागे | ऊपर | Above | |
| दृश्यते | अवलोक्यते | देखा जाता है | Seen | |
| अनुक्षणम् | क्षणाभ्यन्तरे | उसी क्षण | Immediately | |
| रसः | लालारसः / मुखस्रावः | लार | Saliva | |
| एकवारम् | सकृत् | एक बार | Once | |
| द्विवारम् | वारद्वयम् / द्विः | दो बार | Twice | |
| उत्पतति | कूर्दते | कूदता है | Jumps | |

© NCERT not to be republished



Reprint 2026-27

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| पुनः पुनः | भूयो भूयः | बार-बार | Frequently | |
| कथयति | वदति | कहता है | Tells | |
| आम्लम् | आम्लरसयुक्तम् | खट्टा | Sour | |
| द्राक्षाफलम् | मृद्वीकाफलम् | अंगूर | Grapes | |
| पलायते | अन्यत्र धावति | भाग जाता है | Runs away | |



## वयम् अभ्यासं कुर्मः

१. एकः शृगालः इति गीतस्य साभिनयं कक्षायां गानं कुर्वन्तु।

२. अधः प्रदत्तानां प्रश्नानाम् एकपदेन पदद्वयेन वा उत्तरं लिखन्तु—

(क) कः वनं गच्छति? ..........................................

(ख) शृगालः कां पश्यति? ..........................................

(ग) शृगालस्य मुखे किं जायते? ..........................................

(घ) द्राक्षालतायां शृगालः किं पश्यति? ..........................................

(ङ) द्राक्षाफलं कुत्र दृश्यते? ..........................................

(च) किं शृगालः पुनः पुनः उत्पतति? .......................................... (आम्/न)

(छ) किं शृगालः द्राक्षाफलं प्राप्नोति? .......................................... (आम्/न)

३. अधः प्रदत्तानां प्रश्नानां पूर्णवाक्येन उत्तरं लिखन्तु—

(क) शृगालः कथं वनं गच्छति? ..........................................

(ख) वनं गत्वा शृगालस्य किं जायते? ..........................................

(ग) शृगालः द्राक्षाफलं कुत्र पश्यति? ..........................................

© NCERT not to be republished



Reprint 2026-27

(घ) द्राक्षाफलं दृष्ट्वा कस्य मुखे रसः जायते? ..........................................................

(ङ) अन्ते शृगालः किं वदति? ..........................................................

**अत्र इदम् अवधेयम्**

- अस्मिन् पाठे जायते, लभते, पलायते इति एतादृशानि क्रियापदानि सन्ति।
- एतादृशानां क्रियापदानां रूपाणि लट्-लकारे कथं भवन्ति इति पश्यामः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | लभते | लभेते | लभन्ते |
| मध्यमः पुरुषः | लभसे | लभेथे | लभध्वे |
| उत्तमः पुरुषः | लभे | लभावहे | लभामहे |

**४. उपरि प्रदत्तां मञ्जूषां दृष्ट्वा रिक्तस्थानेषु उचितक्रियापदानि लिखन्तु—**

| | | | |
|---|---|---|---|
| (क) | वन्दते | .............................. | .............................. |
| | .............................. | वन्देथे | .............................. |
| | .............................. | .............................. | वन्दामहे |
| (ख) | पलायते | .............................. | .............................. |
| | .............................. | .............................. | .............................. |
| | .............................. | .............................. | .............................. |
| (ग) | जायते | .............................. | .............................. |
| | .............................. | .............................. | .............................. |
| | .............................. | .............................. | .............................. |

**५. उदाहरणानुसारम् एकवचनरूपं दृष्ट्वा द्विवचन-बहुवचनरूपाणि लिखन्तु—**

| धातुः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| कम्प् | कम्पते | कम्पेते | कम्पन्ते |
| वर्ध् | वर्धते | .................... | .................... |



Reprint 2026-27
© NCERT not to be republished

| | | | |
|---|---|---|---|
| वर्त् | वर्तसे | ..................... | ..................... |
| प्र + काश् | प्रकाशते | ..................... | ..................... |
| वन्द् | वन्दे | ..................... | ..................... |
| याच् | याचते | ..................... | ..................... |
| लज्ज् | लज्जसे | ..................... | ..................... |
| वीक्ष् | वीक्षते | ..................... | ..................... |
| सेव् | सेवे | ..................... | ..................... |
| वन्द् | वन्दसे | ..................... | ..................... |
| शुभ् | शोभते | ..................... | ..................... |

**६. उदाहरणानुसारं वाक्यद्वयं लिखन्तु —**

यथा – शत्रुः (पलाय्) ....शत्रुः पलायते.... चोराः (पलाय्) ....चोराः पलायन्ते....

(क) वृक्षः (वर्ध्) .................................. बालाः (वर्ध्) ..................................

(ख) छात्रः (वन्द्) .................................. भक्ताः (वन्द्) ..................................

(ग) वैद्यः (वीक्ष्) .................................. प्रेक्षकाः (वीक्ष्) ..................................

(घ) कर्मचारी (सेव्) .................................. महिलाः (सेव्) ..................................

(ङ) वृक्षः (कम्प्) .................................. रुग्णाः (कम्प्) ..................................

**७. उदाहरणं दृष्ट्वा वाक्यानि उचितरूपैः पूरयन्तु —**

(क) शुनकं दृष्ट्वा बालकस्य भयं (जाय्) ....शुनकं दृष्ट्वा बालकस्य भयं जायते....

(ख) मूषकः मार्जारं दृष्ट्वा (पलाय्) ..................................................................

(ग) रात्रिकाले मार्गदीपाः (प्रकाश्) ..................................................................

(घ) अहं देवं (वन्द्) ..................................................................

(ङ) त्वं किमर्थं (लज्ज्) ..................................................................

(च) वयं देशं (सेव्) ..................................................................



Reprint 2026-27

© NCERT not to be republished

## योग्यताविस्तरः

**श्लोकान् उच्चैः पठन्तु, अर्थम् अवगच्छन्तु च।**

प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहता विरमन्ति मध्याः।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारभ्य चोत्तमजनाः न परित्यजन्ति॥१॥

गच्छन् पिपीलको याति योजनानां शतान्यपि।
अगच्छन् वैनतेयोऽपि पदमेकं न गच्छति॥२॥

## परियोजनाकार्यम्

**त्वं जीवने कदाचित् अभीष्टं वस्तु न लभसे। कदाचित् तव लक्ष्यपूर्तिः न भवति। तदा त्वं किं करोषि, किं च चिन्तयसि इति संस्कृतभाषया/स्वभाषया प्रसङ्गसहितं लिख।**

## कार्यकलापः

मुखेन द्राक्षाफलस्य ग्रहणम् – इति क्रीडां कारयामः। उपरि रज्ज्वा फलस्य मधुरस्य वा बन्धनं कृत्वा तस्याः आकर्षण-शिथिलीकरणैः अध्यापकः क्रीडाङ्गणे क्रीडां कारयति। छात्राः मुखस्य साहाय्येन ग्रहीतुं प्रयत्नं कुर्वन्ति।





Reprint 2026-27

© NCERT not to be republished